# Gandabherundanrisimhamalamantravidhi

# गण्डभेरुण्डनृसिंहमालामन्त्रविधिः

## Document Information

Text title : Gandabherundanrisimhamalamantravidhi

File name : gaNDabheruNDanRRisiMhamAlAmantravidhiH.itx

Category : vishhnu, dashAvatAra, mAlAmantra, mantra, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : September 7, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 7, 2025

*sanskritdocuments.org*

# गण्डभेरुण्डनृसिंहमालामन्त्रविधिः

श्रीगणेशाय नमः ।
अथ अष्टमुख गण्डभेरुण्डनृसिंहमालामन्त्रविधिर्लिख्यते ।
ॐ अस्य श्री अष्टमुखगण्डभेरुण्डनृसिंहमालामन्त्रस्य
सङ्कर्षणभगवान् ऋषिः । नमः शिरसि ।
अनुष्टुप् छन्दः मुखे ।
श्री अष्टमुखगण्डभेरुण्डनृसिंहो देवता हृदि ।
घ्रौं बीजं नाभौ ।
ह्रौं शक्तिः लिङ्गे स्तनौ ।
अष्टमुखगण्डभेरुण्डायेति कीलकम् । गुह्ये लिङ्गे ।
मम सर्वकामनार्थं च अष्टमुखगण्डभेरुण्डनृसिंहप्रसादसिध्यर्थे
जपे विनियोगः ।
ॐ घ्रौं अङ्गुष्ठाभ्यां नमः ।
ॐ घ्रौं तर्जनीभ्यां नमः ।
ॐ घ्रौं मध्यमाभ्यां नमः ।
ॐ क्ष्रौं अनामिकाभ्यां नमः ।
ॐ ह्रौं कनिष्ठिकाभ्यां नमः ।
ॐ घ्रौं स्त्रौं स्त्रौं ह्रौं घ्रौं हुं करतलकरपृष्ठाभ्यां नमः ॥

अथ हृदयादिन्यासः ।
ॐ घ्रौं हृदयाय नमः ।
ॐ घ्रौं शिरसे स्वाहा ।
ॐ घ्रौं शिखाय वषट् ।
ॐ क्ष्रौं कवचाय हुम् ।
ॐ ह्रौं नेत्रत्रयाय वौषट् ।
ॐ घ्रौं स्त्राँ स्त्रौं ह्रौं घ्रौं हुं अस्त्राय फट् ।
भूर्भुवस्वरोमिति दिग्बन्धः ।

अथ ध्यानम् ॥ १॥

वन्देहं घोररूपं प्रबलतरमहं गण्डभेरुण्डसिंहम् ।
व्याघ्राश्वान्क्रोडशाखामृगखगवररा भल्लुकाद्यष्टवक्रम् ।
द्वात्रिंशत्कोटिबाहुं ज्वलमुशल बन्ध बन्ध मां रक्ष रक्ष सर्वत्र तेभ्यो हुं फट् स्वाहा ॥ २॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोरव्याघ्रराजाय यममण्डले महिषारूढाय दण्डहस्ताय याम्यां दिशं बन्ध बन्ध मां रक्ष रक्ष सर्वभूतेभ्यो ॥ ३॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोरहयग्रीवाय सर्पवृश्चिकराजाय कालमण्डलेशवाहनाय खड्गहस्ताय नैरृतिं दिशं बन्ध बन्ध मां रक्ष रक्ष सर्वभूतेभ्यो ॥ ४॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोर आदिवराहाय वरुणमण्डले मकरारूढाय पाशहस्ताय वारुणं दिशं बन्ध बन्ध मां रक्ष रक्ष सर्वभूतेभ्यो ॥ ५॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्डाघोर आदिअञ्जनेयाय वायुमण्डले हरिणारूढाय ध्वजहस्ताय वायव्यदिशं बन्ध बन्ध मां रक्ष रक्ष सर्वभूतेभ्यो ॥ ६॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोर पक्षिगरुडकुबेरमण्डले अश्वारूढाय खड्गहस्ताय कुबेरदिशं बन्ध बन्ध मां रक्ष रक्ष सर्वभूतेभ्यो ॥ ७॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोरभल्लुकमहाराजाय ईशानमण्डले वृषभारूढाय भूतहस्ताय ईशानीदिशं बन्ध बन्ध मां रक्ष रक्ष सर्वभूतेभ्यो ॥ ८॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोर आदिनारायणाय आकाशमण्डले गरुडारूढाय चक्रहस्ताय आकाशदिशं बन्ध बन्ध मां रक्ष रक्ष सर्वभूतेभ्यो ॥ ९॥

गदाशङ्खचक्रादिहेतुं बिभ्राणं भीमदंष्ट्रशरभखगगजान् भक्षयन्तं नृसिंहम् ॥ १०॥

??

कल्पान्ताशनि विस्फुलिङ्ग हुतभुक् जाज्वल्यनेत्रत्रयं तीव्रा वज्रसमानतुंडनखभिः दंष्ट्राभि जिह्वाननम् । पक्षौ मारुत सप्तघाततरणीं अष्टाननं भीषणं ध्यायेदुदण्डरौद्रं शरभमदहरं गण्डभेरुण्डसिंहम् ॥ २॥

अष्टास्या वह्निदंष्ट्रिमीन्दुवरनखाविद्युतज्वालजिह्वा । मारी भीमा च पक्षौ हृदयजठरगौ अष्टकल्पाग्निदुर्गा । ऊरू द्वौ रुद्रकालं खगमृगनृहरिर्गण्डभेरुण्डरूपः विध्वस्तः शरभादि भैरवगणान् शत्रून् सचक्रो हरिः ॥ ३॥

पञ्चोपचारैः सम्पूज्य जपेत् ।
ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोराय महापक्षिराजाय इन्द्रमण्डले गजारूढाय वज्रहस्ताय इन्द्रदिशं बन्ध बन्ध मां रक्ष रक्ष सर्वभूतेभ्यो हुं फट् स्वाहा ॥ ४॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोरवीरनरसिंहाय अग्निमण्डले मेषारूढाय शक्तिहस्ताय अग्नयेदिय अष्टमहासर्पविषभक्षणाय जरामरणवर्जिताय जगदीश्वराय मां रक्ष रक्ष सर्वभूतेभ्यः ॥ ५॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोरमहाभल्लूकराजाय महाभयनिवारणाय भक्तप्रियाय भक्तप्रसन्नमुखाय भक्तगृहनिवासाय मां रक्ष रक्ष सर्वभूतेभ्यः ॥ ६॥

अथ मालामन्त्रः ।
ॐ नमो भगवते अष्टमुखगण्डभेरूण्ड अघोरपक्षमहापक्षिराजाय अघोरवीरनृसिंहाय अघोर व्याघ्रराजाय अघोरहयग्रीवाय अघोर आदिवराहाय अघोरादिवानरेन्द्राय अघोरपक्षीमहागरुडाय अघोर आदिभल्लूकराजाय महाबलपराक्रमाय कोटिसूर्यप्रकाशाय वडवानलमुखाय करालवदनाय वज्रशरीराय वज्रशिखाय वज्रतुण्डाय वज्रदंष्ट्राय वज्रदन्ताय वज्रभुजाय वज्रहस्ताय वज्रनखाय वज्रपक्षाय वज्रपुच्छाय वज्रपादाय दुर्निरीक्षाय अनिवारितकोपाय अपरिमिताष्टहासाय अनेककोटिब्रह्माण्डभस्माद्धूलितशरीराय अनेककोटिब्रह्माण्डोदराय अनेककोटिब्रह्मांडोदरमौ अनेककोटिब्रह्माण्डनायकाय अनेककोटिशीर्षाय अनेककोटिभुजाय अनेककोटिहस्ताय अनेककोटिदिव्यायुधधराय अनेककोटिपादाय अनेककोटिकनकगिरिनव ॥ ७॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोरविराटपुरुषाय पातालमण्डले शेषारूढाय सर्पहस्ताय पातालदिशं बन्ध बन्ध मां रक्ष रक्ष सर्वभूतेभ्यः । इति दिग्बन्धः ॥ ८॥

अथात्मरक्षा ।
ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोरप क्षमहापक्षिराजाय शरभशाल्वेश्वर प्राणापहराय सकलशत्रुसंहारकारणाय सकलशून्यनिवारणाय मां रक्ष रक्ष सर्वभूतेभ्यो हुं फट स्वाहाः ॥ १॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोरवीरनृसिंह अघोरवीरभद्रप्राणापहराय सकलरोगनिवारणाय सकलारोग्यकराय मां रक्ष रक्ष सर्वभूतेभ्यः ॥ २॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोरव्याघ्रराजाय महिषराक्षसप्राणापहराय महामदोन्मत्ताय महाव्यालाय महादीप्ताय मां रक्ष रक्ष सर्वभूतेभ्यः ॥ ३॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोर आदिहयग्रीवाय सकलमुकत्त्वविमोचनाय सकलवेद् सकलशास्त्रसकलविद्याप्रदाय सकलशत्रुमन क्षोभनाय सकलकार्यप्रदाय मां रक्ष रक्ष सर्वभूतेभ्यः ॥ ४॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोर आदिवराहाय दारिद्र्यध्वंसकाय अष्टैश्वर्याकर्षणाय अष्टपुत्रप्रदाय अखिलैश्वर्याय मां रक्ष रक्ष सर्वभूतेभ्यः ॥ ५॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोर वानरेन्द्राय सकलग्रहोच्चाटनाय सकलराक्षससंहारकरणाय सकलसुरासुरवन्दिताय सकलजीवनिवासाय मां रक्ष रक्ष सर्वभूतेभ्यः ॥ ६॥

ॐ नमो भगवते अष्टमुखगण्डभेरुण्ड अघोर पक्षिमहागरुडाय महानागकृतान्तकाय कोटिकनकगिरि नवरत्नमकरकुण्डलाङ्कृतकर्णाय अनेककोटिकनकगिरिनवरत्न कङ्कणालङ्कृतकराय अनेककोटिकनकगिरिनूपुरालङ्कृतपादाय अनेककोटि यमगणशरीररोमालङ्कृताय अनेककोटिशरभशाल्वेश्वरप्राणापहराय एकादशरुद्रगर्वापहराय अष्टभैरवप्रभञ्जनाय जगन्मुखान्तकाय अघोरवीरभद्रप्राणापहराय महानन्दीमर्दनाय एहि एहि आगच्छ आगच्छ अवतर अवतर गर्ज गर्ज गर्ज भीषय भीषय स्फुर स्फुर अघोरतनु रुष रुष चण्ड चण्ड प्रचण्ड प्रचण्ड प्रहर प्रहर प्रलय प्रलय ज्वल ज्वल प्रज्वल प्रज्वल दह दह पच पच हन हन तुरु तुरु घुरु घुरु आचक्रन्दय चक्रन्दय परिवेशय परिवेशय पूर्वपश्चिम दक्षिणोत्तर ईशान्याग्नेय निरृतिवायव्योर्ध्वोन्तरिक्षसर्वदिक्सन्धिसर्वदिशां ज्वालासुदर्शनचक्रेण बन्धय बन्धय अस्मिन्भूतमण्डलं प्रवेशय प्रवेशय आं आं भूतमण्डलं यमपाशेन बन्धय बन्धय ह्रीं ह्रीं भूतमण्डलं मोहनास्त्रेण मोहय मोहय स्तम्भनास्त्रेण स्तम्भय स्तम्भय क्रौं क्रौं प्रलयाङ्कुशेनाकर्षय आकर्षय ठं ठः भूतमण्डलं स्तम्भनास्त्रेण केशादिपादपर्यन्तं स्तम्भय स्तम्भय ह्रीं ह्रीं भूतमण्डलं ब्रह्मास्त्रेण जिह्वां कीलय कीलय रं रं भूतमण्डलं नाशय नाशय भूतप्रेतपिशाचोरगडाकिनीशाकिनीकामिनीमोहिनीयक्षराक्षसकूभाण्डवैताल ब्रह्मराक्षसमारीमहामारीभासुरीरेणुकाकालरात्रिकालमृत्युमपमृत्युप्रलयकाल प्रलयाग्निरुद्रभययमदूतभयाभेद्यग्रह असाध्यग्रहभयानि भेदय भेदय बं बन्धय

बन्धय घं घातय घातय शं शोषय शोषय त्रं त्रोटय त्रोटय भ्रां भ्रामय भ्रामय रीं रोटय रोटय मं मोटय मोटय गं गल गल गुं गुजुं गुजुं तुं तुरु तुरु मिं मिलि मिलि मुं मुरु मुरु हिं हिलि हिलि मिं म्लि म्लि वं वज्रपातेन मर्दय मर्दय मुं मुशलेन ताडय ताडय गं गदापातेन चूर्णय चूर्णय वं ग्लि वं वज्रपातेन मर्दय मर्दय मुं मुशलेन ताडय ताडय गं गदापातेन चूर्णय चूर्णय वं वज्रनखेन क्रन्तय क्रन्तय खं खड्गेन खण्डय खण्डय चं चक्रेण छेदय छेदय मं मारय मारय घां अष्टमुखगण्डभेरुण्ड महापक्षिराजाय रौं रौं अघोरवीरनारसिंहाय ह्रौं ह्रौं आदिहयग्रीवाय हुं हुं आदिवराहाय हुं घ्रौं अघोरवानरेन्द्राय क्षीं क्षीं अघोरपक्षिमहागरुडाय हौं हौं अघोरमहाभल्लुकराजाय सर्वजनमनोहराय सर्वमुखरञ्जनाय सर्वराजवशीकराय सर्वदारिद्रयभेदकाय सकलविद्याप्रदाय सकलविज्ञानप्रदाय त्रिमूर्त्रिजनकाय निर्गुणस्वरूपाय निरञ्जनाय सगुणस्वरूपाय समरप्रियाय अघोर विराटपुरुषाय अघोर अघोर विश्वेश्वर मनोहराय अघोरनारायणाय अघोरलक्ष्मीप्रियाय स्वाहा ॥

१२३४ अक्षरसङ्ख्या ॥ श्लोक ३८॥

इति मालामन्त्रः समाप्तः ॥

ॐ घ्रौं क्ष्रौं ह्रौं क्ष्रौं क्ष्रौं ष्ठ्रौं क्ष्रौं क्ष्रीं ह्रीं ह्रीं फट् गण्डभेरुण्डनृसिंहाय महाशरभान्तकाय हुं फट् ज्वल ज्वल प्रज्वल प्रज्वल सर्वशत्रून् हन हन हुं फट् स्वाहा ॥

श्रीलक्ष्मीनृसिंहार्पणमस्तु ॥

ॐ नमो भगवते अमृतोद्भवाय मम देहे अमृतं कुरु कुरु स्वाहा ।
देहरक्षणार्थं सुरतरु कल्पवृक्ष मन्त्रराजः ।
कौबेरं ते मुखं रौद्रं नन्दितानन्दितं बहु ।
मृत्युभयं महाघोरं ज्वरं नाशय मे ज्वर ॥ १॥

इति श्लोकात्मकं मन्त्रं सर्वज्वरविनाशानम् ।
जलाञ्जलि मन्त्रक्षेपा सत्यं सत्यं शिवभातिलम् ॥ २॥

(पं. गणपत यज्ञेश्वरस्य इदं पुस्तकम् ।)

इति गण्डभेरुण्डनृसिंहमालामन्त्रविधिः सम्पूर्णा ।

A note of caution or disclaimer:
The text here is given for
academic purpose, for information, only as it
appears in a book. Considered as a tantric text,

esoteric in nature, readers are advised caution about its indiscriminate usage or application of the same. It is very clear that a guru's guidance is always essential for mantra practices and practicing without the same leads to no merit or can in fact backfire.

Proofread by M K Barman

*Gandabherundanrisimhamalamantravidhi*
pdf was typeset on September 7, 2025

Please send corrections to *sanskrit@cheerful.com*